छाया – इषुच्छायम् । धनुश्छायम् । इषुशब्दः 'ईषेः किच्च' (उ.१३) इत्युप्रत्ययान्तः, तत्र च 'धान्ये नित्' (उ.९) इति वर्तते, तेनाद्युदात्तः । धनुःशब्दोऽपि 'नब्विषयस्यानिसन्तस्य' (फि.सू. २६) इत्याद्युदात्त एव । इषूणां छाया इति षष्ठीसमासः । 'छाया बाहुल्ये' (२. ४. २२/८२५) इति नपुंसकलिङ्गता । नपुंसके इति किम् ? [1]कुड्यच्छाया ॥

## सुखप्रिययोर्हिते । (१८/३७४९)

सुख प्रिय इत्येतयोरुत्तरपदयोर्हितवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । गमनसुखम् । वचनसुखम् ।[2]व्याहरणसुखम् । प्रिय – गमनप्रियम् । वचनप्रियम् । [3]व्याहरणप्रियम् । समानाधिकरणसमासा एते । तत्र सुखप्रियशब्दौ तद्धेतावायत्यां प्रीतिकरे वर्तेते । तद्धि हितं यदायत्यां प्रीतिं करोति । गमनादिषु ल्युडन्तेषु लित्स्वरः । हिते इति किम् ? परमसुखम् । परमप्रियम् ॥

## प्रीतौ च । (१६/३७६०)

प्रीतौ गम्यमानायां सुख प्रिय इत्येतयोः उत्तपदयोः तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । ब्राह्मणसुखं पायसम् । छात्रप्रियोऽनध्यायः । कन्याप्रियो मृदङ्गः । सुखप्रिययोः प्रीत्यव्यभिचारादिह प्रीतिग्रहणं तदतिशय-[4]प्रतिपत्त्यर्थम् । ब्राह्मणछात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । कन्याशब्दः स्वरितान्तः । प्रीतौ इति किम् ? राजसुखम् । राजप्रियम् ॥

## स्वं स्वामिनि । (१७/३७६१)

स्वामिशब्दे उत्तरपदे[5] तत्पुरुषे समासे स्ववाचि पूर्वपदं प्रकृतिस्वरं भवति । गोस्वामी । अश्वस्वामी । धनस्वामी । अश्वधनगवां कथित एव स्वरः । स्वमिति किम् ? परमस्वामी ॥

## पत्यावैश्वर्ये । (१८/३७६२)

पतिशब्दे उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे[6] पूर्वपदं प्रकृतिस्वरं भवति । गृहपतिः । सेनापतिः । नरपतिः । धान्यपतिः[7] । 'गेहे कः' (३. १. १४४/२९०६) इति प्रकृतिस्वरेणान्तोदात्तो गृहशब्दः । सह इनेन वर्तते इति 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (६. २. १/३७३५) इति [8]सेनाशब्द आद्युदात्तः । 'नृ नये' (धा.पा. १४९६) एतस्माद् 'ऋदोरप्' (३. ३. ५७/३२३२) इति अप्प्रत्ययान्त [9]आद्युदात्तो नरशब्दः । धान्यमन्तस्वरितम् । ऐश्वर्यम् इति किम् ? [10]ब्राह्मणो वृषलीपतिः । वृषल्या भर्ता इत्यर्थः ॥

---

1. कृष्णच्छायम् क. 2. व्याकरणसुखम् फ. 3. व्याकरणप्रियम् फ. ह. 4. प्रसिद्ध्यर्थम् ह. 5. ऐश्वर्यवाचिनि इत्यधिकम् क. 6. समासे इत्यधिकम् ह. 7. गोपतिः अजापतिः इत्यधिकम् ह. फ. 8. सेना फ. 9. आद्युदात्तः नास्ति क. 10. ब्राह्मणीपतिः क.